ज्वरनाशनः” मन्त्रौषधादीनां चतुर्णां प्रत्येकं रसार्द्धम् । अन्यविधोऽपि “मरिचं टङ्कनं शङ्खचूर्णं पारदगन्धकम् । शोधितं वत्सनाभञ्च भागमेकं विनिःक्षिपेत् । गुञ्जामात्रा प्रदातव्या नागवल्लीदलैः सह । ज्वराङ्कुशो रसोह्येष ज्वरमष्टविधं जयेत्” अन्यविधोऽपि “त्रिभागतालेन हृतञ्च ताम्रं रसञ्च गन्धञ्च समीनमायुः । विषं समं तद्द्विगुणञ्च ताम्रं त्रिसप्तवारञ्च दिवाकरातपे । संमर्द्य निम्बुस्वरसेन चूर्णं गुञ्जाप्रमाणं सितया समेतम् । ज्वराङ्कुशोऽयं विविधप्रभावो ज्वरं निहन्त्यष्टविधं समग्रम्” मीनमायुः मत्स्यपित्तम् । [राजनि० ।

**ज्वराङ्गी** स्त्री ज्वरस्तद्बाधनमङ्गमस्याः ङीष् । भद्रदन्तिकायां

**ज्वरातिसार** पु० । ज्वरयुक्तोऽतिसारः । ज्वरयुक्ते अतिसाररोगे तत्स्वरूपादि भैषज्यर०उक्तौ यथा ।“पित्तज्वरे पित्तभवोऽतिसारस्तथातिसारे यदि वा ज्वरः स्यात् । दोषस्य दुष्यस्य समानभावाज्ज्वरातिसारः कथितो भिषग्भिः” ।“ज्वरातिसारयोरुक्तमन्योन्यं भेषजं पृथक् । न तन्मिलितयोः कुर्यादन्योन्यं वर्द्धयेद् यतः । प्रायोज्वरहरं भेदि, स्तम्भनन्त्वतिसारनुत् । अतोऽन्योन्यविरुद्धत्वाद् वर्द्धनं तत्परस्परम् । ज्वरातिसारिणामादौ कुर्यात् लङ्घनपाचने । प्रायस्तावामसम्बन्धं विना न भवतो यतः । ज्वरातिसारे पेयादिक्रमः स्याल्लङ्घिते हितः । ज्वरातिसारी पेयां वा पिवेत् साम्लां शृतां नरः” ।

**ज्वरान्तक** पु० ज्वरस्यान्तक इव ज्वरमन्तयति वा अन्ति-ण्वुल् वा ६त०कर्म्म० । आरग्वधे नेपालनिम्बे (सोंदाल) राजनि० । ज्वरान्तकरसः ।

**ज्वरान्तकरस** पु० ज्वरस्यान्तकः कर्म० ।

“भास्कारोगन्धकः सर्जो देवी विहङ्गतीक्ष्णकम् । शोधितं गगनञ्चैव पुष्करञ्च महेश्वरम् । भूनिम्बादिगणैर्भाव्यं मधुना गुड़िका दृढ़ा । चातुर्थकं तृतीयञ्च ज्वरं सन्ततकं तथा । आमज्वरं भूतकृतं सर्वज्वरमपोहति” भैषज्यर० उक्ते औषधभेदे । अत्र सर्जोरसः, देवी सौराष्ट्रमृत्तिका, विहङ्गं स्वर्णमाक्षिकं, पुष्करं रसाञ्जनं, महेश्वरं सुवर्णम् अन्यत् सुगमम् । ताम्रादीनां समभागचूर्णं भूनिम्बादिक्वाथेन भावयेत् । भूनिम्बाद्यष्टादशद्रव्याणि सर्वद्रव्यतुल्यानि अष्टावशिष्टं क्वाथं कृत्वा दिनत्रयं विभाव्य विशोष्य मधुना विमर्द्य अनुरूपं लिहेत्”

**ज्वरापहा** स्त्री०ज्वरमपहन्ति अप+हन–ड ६त०। (बेलसुँठ) १विल्वशुण्ठ्याम्, २विल्वपत्र्याञ्च । ३ज्वरनाशके त्रि० । शब्दच० ।

**ज्वरार्य्यभ्र** पु० ज्वरस्यारिः कर्म्म० ।

“अभ्रं ताम्रं रसं गन्धं विषञ्चेति समं समम् । द्विगुणं धूर्त्तबीजञ्च व्योषं पञ्चगुणं मतम् । जलेन वटिकां कुर्य्याद् यथा दोषानुसारतः । अभ्रं ज्वरारिनामेदं सर्वज्वरविनाशनम् । वातिकान् पैत्तिकांश्चैव श्लैष्मिकान् सान्निपातिकान् । विषमाख्यान् द्वन्द्वजांश्च धातुस्थान् विषमज्वरान् । नाशयेन्नात्र सन्देहो वृत्रमिन्द्राशनिर्यथा । प्लीहानं यकृतं गुल्ममग्निमान्द्यं सशोथकम् । कासं श्वासं तृषां कम्पं दाहं शीतं वमिं भ्रमिम्” भैषज्यर० उक्ते औषधभेदे ।

**ज्वरारिरस** न० ज्वरस्यारिः कर्म्म० ।

“दरदवलिरसानां शुल्वनागाभ्रकाणाम् शुभविटकशिलानां सर्व्वमेकत्र योज्यम् । विपिननृपदलोत्थैर्भावितं शोषयेत्तम् दिवसदशसमाप्तौ रक्तिकैकाञ्च कुर्य्यात् । एकैकां भक्षयेदस्य चार्द्रकस्य रसैर्युताम् । दत्तमात्रं ज्वरं हन्ति ज्वरारिः स निगद्यते । सर्वशूलविनाशी च कफपित्तविनाशनः” । भैषज्यर० उक्ते औषधभेदे । सर्वं (सोँदाली) पत्ररसेन दशदिनं भावयित्वा गुञ्जाप्रमाणमार्द्रकरसेन देयम्” ।

**ज्वराशनिरस** पु० ज्वरस्याशनिरिव नाशकत्वात् कर्म० ।

“रसं गन्धं सैन्धवञ्च विषं ताम्रं समं भजेत् । सर्वचूर्णसमं लौहं तत्समं चूर्णमभ्रकम् । लौहे च लौहदण्डे च निर्गुण्ड्याः स्वरसेन च । मर्दयेत् यत्नतः पश्चान्मरिचं स्वतुल्यकम् । पर्णेन सह दातव्यो रसो रक्तिकसम्मितः । कासं श्वासं महाघोरं विषमाख्यं ज्वरं वमिम् । धातुस्थं प्रबलं दाहं ज्वरदोषं शिरोद्भवम् । यकृद्गुल्मोदरप्लीहश्वयथुञ्च विनाशयेत्” भैषज्यर०उक्ते औषधभेदे । [ज्वरशब्दे उदा० ।

**ज्वरित** त्रि०ज्वरः संजातोऽस्य तारका० इतच् । १ज्वरयुक्ते

**ज्वरिन्** त्रि० ज्वरोऽस्त्यस्य इनि । ज्वरयुक्ते स्त्रियां ङीप् ।

**ज्वल** दीप्तौ चलने च भ्वा० पर० अक० सेट् । ज्वलति अज्वालीत् । घटा० ज्वलयति । ज्वला० ज्वलः ज्वालः । “अज्वाल लोकस्थितये स राजा” भट्टिः । “जागर्त्ति लोको ज्वलति प्रदीपः सखीगणः पश्यति कौतुकेन । मुहूर्त्तमात्रं कुरु नाथ ! धैर्य्यं बुभुक्षितः किं द्विकरेण भुङ्क्ते” उद्भटः ।